पञ्चदशः पाठः
१५

# रघोः उदारता

## ( उकारान्त-पुँल्लिङ्गशब्दाः )

प्राचीनकालस्य वार्ता अस्ति । एकः रघुः नामकः नृपः भवति । सः स्वस्य सर्वं धनं 'विश्वजित्-यज्ञे' दानं करोति। रघोः पार्श्वे केवलं मृत्तिका-पात्राणि अवशिष्टानि भवन्ति । तस्मिन् एव समये गुरोः वरतन्तोः शिष्यः कौत्सः तत्र आगच्छति । रघुः कौत्सस्य आतिथ्यं करोति । तत्पश्चात् महाराजः रघुः कौत्सम् आगमनस्य प्रयोजनं पृच्छति । कौत्सः रघुं वदति - "हे रघो ! भवान् जानाति एव यत् विद्यासमापनसमये गुरूणां कृते दक्षिणाप्रदानं शिष्याणां कर्तव्यम् अस्ति । मम अपि गुरुकुलस्य शिक्षा सम्पन्ना ।



अधुना अहम् अपि गुरोः वरतन्तोः कृते दक्षिणां दातुम् इच्छामि । मम गुरुः वरतन्तुः पूर्णतया तृष्णारहितः अस्ति । अतः सः तु दक्षिणारूपेण किमपि न इच्छति । किन्तु अहं गुरवे दक्षिणार्थं चतुर्दशकोटिसुवर्णमुद्राः दातुम् इच्छामि । अहं चिन्तयामि यत् भवान् मम सहायतां करिष्यति । किन्तु अधुना भवान् एव स्वर्णपात्राणां स्थाने मृत्तिकापात्राणां प्रयोगं करोति। एतद् भवतः धनाभावं सूचयति । अतः अहं चिन्तयामि यत् भवान् मम सहायतां कर्तुं न शक्नोति । अहम् अन्यत्र गच्छामि ।"



रघुः कौत्सस्य वार्तां श्रुत्वा कथयति– "हे कौत्स ! भवान् अन्यत्र मा गच्छतु । यद्यपि सम्प्रति यज्ञे सर्वस्वदानात् भवतः गुरुदक्षिणार्थं मम पार्श्वे धनं नास्ति । किन्तु अहं प्रयासं करिष्यामि । भवान् द्विदिवसपर्यन्तं मम यज्ञशालायां निवासं करोतु ।" रघोः वार्तां श्रुत्वा कौत्सः तत्रैव तिष्ठति ।

रघुः कौत्सस्य सहायतायाः उपायं चिन्तयति । सः विचारयति "कुबेरः धनपतिः अस्ति । तस्योपरि आक्रमणं कृत्वा अहं पर्याप्तं धनं प्राप्तुं शक्नोमि । अतः प्रातःकाले कुबेरस्योपरि आक्रमणं करिष्यामि ।"

यदा कुबेरः रघोः निश्चयं शृणोति तदा सः भीतः भवति । भयवशात् कुबेरः रात्रिकाले एव रघोः कोषे सुवर्णवृष्टिं करोति । प्रातः कोषरक्षकः कोषे अत्यधिकं सुवर्णं पश्यति । झटिति एव सः रघुं सूचयति ।

महाराजः रघुः तस्मिन् एव समये कौत्सम् आह्वयति । सर्वं सुवर्णं दातुम् इच्छति । किन्तु कौत्सः कथयति, "हे महाराज ! गुरुदक्षिणार्थं चतुर्दशकोटिसुवर्णमुद्राः एव इच्छामि । ततः अधिकं न स्वीकरिष्यामि ।" तदा रघुः कौत्सस्य कृते चतुर्दशकोटिस्वर्णमुद्राः ददाति ।

कौत्सः रघवे आशीर्वादं ददाति, स्वगुरोः आश्रमं प्रति गच्छति ।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| नृपः | राजा | राजा |
| स्वस्य | निजस्य | अपना |
| पार्श्वे | समीपे | पास में |
| मृत्तिका–पात्राणि | मृद्भाजनानि | मिट्टी के बर्तन |
| अवशिष्टानि | शेष–भूतानि | बचे हुए |
| प्रयोजनम् | उद्देश्यम् | उद्देश्य |

| | | |
|---|---|---|
| सम्पन्ना | सम्पूर्णा | सम्पूर्ण हुई |
| तृष्णारहितः | इच्छारहितः | इच्छारहित |
| गुरवे | आचार्याय | गुरु के लिए |
| कोटि | शतलक्षपरिमितम् | करोड़ों |
| पात्राणाम् | भाजनानाम् | बर्तनों के |
| धनाभावम् | धनस्य न्यूनताम् | धन की कमी को |
| चिन्तयामि | विचारयामि | सोचता हूँ |
| शक्नोति | अर्हति | सकता है |
| अन्यत्र | अन्यस्मिन् स्थाने | दूसरी जगह पर |
| श्रुत्वा | श्रवणं कृत्वा | सुनकर |
| तत्रैव | तस्मिन् एव स्थाने | वहाँ पर ही |
| प्राप्तुं | स्वीकर्तुम् | प्राप्त करने के लिए |
| भयवशात् | भीतिकारणात् | डर के कारण से |
| कोषे | धनभण्डारे | खजाने में |
| सुवर्णवृष्टिम् | स्वर्णवर्षाम् | सोने की वर्षा को |
| कोषरक्षकः | कोषस्य रक्षकः | खजाने का रखवाला |
| झटिति | शीघ्रम् | जल्दी से |
| सूचयति | सूचनां ददाति | सूचना देता है |
| आह्वयति | आह्वानं करोति | बुलाता है |

## अभ्यासः

**१. उच्चारणं कुरुत –**

| | | | |
|---|---|---|---|
| विश्वजित् | अवशिष्टानि | मृत्तिका | आतिथ्यसत्कारम् |
| विद्यासमापनसमये | तृष्णारहितः | सुवर्णमुद्रा | गुरुदक्षिणार्थम् |
| द्विदिवसपर्यन्तम् | कुबेरस्योपरि | कोषरक्षकः | आह्वयति |

**२. एकपदेन उत्तरत–**

(क) रघुः कस्मिन् यज्ञे सर्वस्वं धनं दानं करोति ?

(ख) कौत्सः कस्य शिष्यः अस्ति ?

(ग) कुबेरः कस्य वृष्टिं करोति ?

(घ) कस्य भयवशात् कुबेरः सुवर्णवृष्टिं करोति ?

(ङ) कौत्सः रघवे किं ददाति ?

## ३. पूर्णवाक्येन उत्तरत -

(क) कौत्सः कः अस्ति ?

(ख) विद्यासमापनसमये शिष्याणां किं कर्तव्यम् भवति ?

(ग) गुरुदक्षिणारूपेण कौत्सः किं दातुम् इच्छति ?

(घ) रघोः निश्चयं श्रुत्वा कुबेरः किं करोति ?

(ङ) प्रातःकाले कोषरक्षकः कोषे किं पश्यति ?

## ४. सत्यकथनस्य समक्षे 'आम्' इति असत्यकथनस्य समक्षे 'न' इति लिखत -

| | |
|---|---|
| **यथा** - रघुः कौत्सस्य आतिथ्यं करोति । | ( आम् ) |
| (क) कौत्सः वरतन्तोः शिष्यः अस्ति । | ( ) |
| (ख) अश्वमेधयज्ञे रघुः सर्वस्वं दानं करोति । | ( ) |
| (ग) लक्ष्मीः कोषागारे सुवर्णवृष्टिं करोति । | ( ) |
| (घ) रघुः चतुर्दशकोटि-सुवर्णमुद्राः ददाति । | ( ) |
| (ङ) कौत्सः द्विदिवसपर्यन्तं राजभवने निवासं करोति । | ( ) |

## ५. उदाहरणं दृष्ट्वा वचनरूपाणि लिखत -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **यथा** - | रघुः | रघू | रघवः |
| (क) | ........................... | गुरू | ........................... |
| (ख) | पशुः | ........................... | ........................... |
| (ग) | ........................... | ........................... | विधवः |
| (घ) | ऋतुः | ........................... | ........................... |
| (ङ) | ........................... | विभू | ........................... |

## योग्यता-विस्तारः

१. अस्मिन् पाठे यूयम् उकारान्त-पुँल्लिङ्गशब्दानां प्रयोगं दृष्टवन्तः । येषां पुँल्लिङ्गशब्दानाम् अन्ते 'उ' (उकारः) भवति, ते उकारान्त- पुँल्लिङ्गशब्दाः भवन्ति ।

**पश्यत –**

| | | | |
|---|---|---|---|
| ग् + उ + र् + उ | = | गुरु | ( गुरु + : = गुरुः ) |
| भ् + आ + न् + उ | = | भानु | ( भानु + : = भानुः ) |
| र् + अ + घ् + उ | = | रघु | ( रघु + : = रघुः ) |
| व् + इ + भ् + उ | = | विभु | ( विभु + : = विभुः ) |

एते सर्वे उकारान्त–पुँल्लिङ्गशब्दाः सन्ति । एतेषां प्रथमा–द्वितीया–पष्ठी–विभक्तिषु रूपाणि एवं प्रचलन्ति –

### प्रथमा विभक्तिः

| शब्दः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| गुरु | – | गुरु : | गुरू | गुरवः |
| भानु | – | भानुः | भानू | भानवः |
| रघु | – | रघुः | रघू | रघवः |

### द्वितीया विभक्तिः

| शब्दः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| गुरु | – | गुरुम् | गुरू | गुरून् |
| भानु | – | भानुम् | भानू | भानून् |
| रघु | – | रघुम् | रघू | रघून् |

### षष्ठी–विभक्तिः

| शब्दः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| गुरु | – | गुरोः | गुर्वोः | गुरूणाम् |
| भानु | – | भानोः | भान्वोः | भानूनाम् |
| रघु | – | रघोः | रघ्वोः | रघूणाम् |

२. एवम् एव अन्येषाम् उकारान्तपुँल्लिङ्गशब्दानाम् अभ्यासं कुरुत।

**अध्यापकाय निर्देशः –**

। अध्यापकः उकारान्त–पुँल्लिङ्गशब्दानां प्रथमा–द्वितीया–षष्ठी–विभक्तीनां प्रमुखतया अभ्यासं कारयेत्। अन्यासाम् अपि विभक्तीनां रूपाणां परिशिष्टसाहाय्येन सामान्यपरिचयं कारयेत्।